# ॥ नारायण सूक्तम् ॥

# (b) NARAYANA SOOKTAM

# ॥ नारायण सूक्तम् ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्व-शम्भुवम् ।

विश्वं नारायणं देव-मक्षरं परमं पदम् ।

विश्वतः परमा-न्नित्यं विश्वं नारायणꣳ हरिम् ।

विश्वमे-वेदं पुरुष-स्तद्विश्व-मुपजीवति ।

पतिं विश्व-स्यात्मेश्वरꣳ शाश्वतꣳ शिव-मच्युतम् ।

नारायणं महाज्ञेयं विश्वात्मानं परायणम् ।

नारायण-परो ज्योति-रात्मा नारायणः परः ।

नारायण परं ब्रह्म तत्वं नारायणः परः ।

नारायण-परो ध्याता ध्यानम् नारायणः परः ।

यच्च किञ्चि-ज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥

अन्त-र्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

अनन्त-मव्ययं कविँ समुद्रेऽन्तं विश्व-शम्भुवम् ।

पद्मकोश प्रतीकाशँ हृदयं चाप्यधो-मुखम् ।

अधो निष्टया वितस्यान्ते नाभ्या-मुपरि तिष्ठति ।
ज्वालमाला-कुलं भाति विश्व-स्याय तनं महत् ।
सन्ततꣳ शिलाभिस्तु लम्बत्या कोश-सन्निभम् ।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन् त्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्नि र्विश्वार्चि र्विश्वतोमुखः ।
सोऽग्रभुग्वि भजन्तिष्ठ-न्नाहार-मजरः कविः ।
तिर्यगूर्ध्व मध-श्शायी रश्मय-स्तस्य सन्तता ।

सन्ता-पयति स्वं देह-मापाद् तलमस्तकः ।
तस्य मध्ये वह्नि-शिखा अणीयोर्ध्वा व्यवस्थितः ।
नीलतो यद्-मध्यस्था द्विद्युल्लेखेव भास्वरा ।
नीवार-शूकवत्तन्वी पीता भास्व-त्यणूपमा ।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ।

ॐ शान्तिः शान्तिः शान्तिः ॥